# Shivakshetreshu Sundarakrita Shivashivastutayah

# શિવક્ષેત્રેષુ સુન્દરકૃતા શિવશિવાસ્તુતયઃ

## Document Information

Text title : Shivakshetreshu Sundarakrita Shivashivastutayah

File name : shivakShetreShusundarakRRitAshivashivAstutayaH.itx

Category : shiva, shivarahasya, tIrthakShetra, devii

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | sadAshivAkhyaH navamAMshaH | adhyAyaH 21 (chit)sabhAdarshanam | vAvRRittashlokAH ||

Latest update : July 14, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 14, 2024

*sanskritdocuments.org*

# શિવક્ષેત્રેષુ સુન્દરકૃતા શિવશિવાસ્તુતયઃ

(શિવરહસ્યાન્તર્ગતે સદાશિવાખ્યે)
સુન્દરઃ ઉવાચ ।
(કાઞ્ચીક્ષેત્રે કમ્પાતટે)
હે કામનાશન હિરણ્મયદર્શનાઙ્ગ
હે વ્યોમકેશ ગરલાશન કાલકાલ ।
હે શાશ્વતાવ્યય વિભો મુદિરાભકણ્ઠ
ત્વત્સત્પ્રભા મમ હૃદિ પ્રસરત્વવશ્યમ્ ॥ ૧૪॥

શમ્ભો રસાલવરમૂલગ કાલકાલ
હાલાહલોત્તમગલામલ હસ્તશૂલ ।
ભાલાનલજ્વલિતકામસુદેહતૂલ
વ્યાલોરુમાલ પરિપાહિ જગત્સુમૂલ ॥ ૨૧॥

દેવિ ત્વં ગિરિરાજસાગર કુલોત્તુઙ્ગોદ ચન્દ્રોજ્જ્વલે
(દેવિ ત્વં ગિરિરાજરાજસુકુલોત્તુઙ્ગાબ્ધિચન્દ્રોજ્જ્વલે)
નીલેન્દીવરલોચનોરુયુગલે નીલાલકાલઙ્કૃતે ।
પૂર્ણેન્દુદ્યુતિકાન્તિરાજિતમુખે બિમ્બાધરે કુન્દજ-
ભ્રાજત્કોરકદન્તપઙ્ક્તિમધુરે કામાક્ષિ તુભ્યં નમઃ ॥ ૨૩॥

ત્વં મત્તેભમરાળરાજગમને મત્તેભકુમ્ભાભજિ-
ત્કાન્તોતુઙ્ગકુચદ્વયીપરિયુતે વ્યાલાભવેણીસ્ફુર-
દ્રત્નભ્રાજિતપદ્મપુષ્પ વિલસન્નાસાલસન્મૌક્તિકે
મઞ્જીરદ્વયપાદપદ્મજરણત્પદ્માભપાદદ્વયે ॥ ૨૪॥

કાઞ્ચીકાઞ્ચિતસત્કટીતટયુતે હસ્તોલ્લસત્કઙ્કણે ।
કૌસુમ્ભદ્યુતિ ચઞ્ચલાઙ્ગલતિકે કામાક્ષિ તુભ્યં નમઃ ॥ ૨૫॥

(વૃદ્ધાચલે)
ભગણાધિપચૂડમૌલિ શમ્ભો

ઉગણ ત્વાં ગણવૃન્દવન્દિતાઙ્ઘ્રિમ્ ।
અરુણાધિપાધુના પદં તે
શરણં યામિ શરણ્યમિન્દુમૌલે ॥ ૨૯॥

વરુણાલયપારણાનતં તે
પદપદ્મં મરણેઽપિ યે સ્મરન્તિ ।
તરુણં ચ ભવેદ્ભવામ્બુધેઃ
કરુણાશાલિ કટાક્ષવીક્ષણં તે ॥ ૩૦॥

(ગોપવર્તે)
વિદ્યુત્પિઙ્ગજટોત્તમાઙ્ગ સુમહામાતઙ્ગચર્મામ્બર
ગઙ્ગાતુઙ્ગતરઙ્ગસઙ્ગમ મહાલિઙ્ગાઙ્ગસંસ્થ પ્રભો ।
ઉક્ષાઙ્ગસ્થિત કામિનીવિલસિતસ્વાર્ધાઙ્ગ કૌરઙ્ગસં-
લ્લક્ષ્માલઙ્કૃતમૌલિવીક્ષણભવત્પાતઙ્ગનઙ્ગાગતે
પાદાબ્જ દૃગપાઙ્ગતોઽઘકલયે મોક્ષશ્રિયા સઙ્ગતમ્ ॥ ૩૪॥

(પુણ્ડરીકપુરે)
ત્વમઙ્ઘ્રિપાણાં પતિરિન્દુમૌલે
ગિરીશ ઇત્યેવ શ્રુતેર્ગિરેડિતઃ ।
ક્વ તે સ્તુતિર્વાઙ્મનસામગોચરા
ન મેઽનુભાવ્યા પદવીમથાણુ ॥ ૩૭॥

(અભ્રસભાન્તરે)
શમ્ભો બાલેન્દુચૂડદ્યુતિવિજિતદિશાસ્તોમસીમાનુરાગં
કુલ્લોલ્લેખમુખાન્તભાગકુમુદાં સ્તોમાવિભૂમાનિ તે ।
સામસ્તોમગુણભિરામનિતરાં શ્રીવામદેવ પ્રભો
કામાઙ્ગોત્થિતભસ્મ રઞ્જિતતનો માં પાહિ સામ્બ પ્રભો ॥ ૫૧॥

કાલવ્યાલમુખાનલોદ્ધત મહાજ્વાલાદિદગ્ધં જગત્
ત્વત્સોમાઞ્ચિતલોચનેન નિતરાં પુષ્યેત તુષ્યેત ચ ।
પુષ્યત્ત્વત્પદપદ્મસંયુતમહામઞ્જીર શિઞ્જદ્ધ્વનો
દૂરીકર્તુમલં મહાઘજનિતં સન્તાપવૃન્દં હર ॥ ૫૨॥

મન્દારવૃન્દમકુટીતટપાદપદ્મ-
નિર્યન્મરન્દરસલગ્નમધુવ્રતોઽયમ્ ।
નાન્યં હૃદેચ્છતિ સુરાન્તરસંવિલગ્નં

ભુગ્નં સદા ભજતિ તે પદપદ્મલગ્નઃ ॥ ૫૩॥

સંસાર સર્પો(ઘોરો)દ્ધતસર્પદષ્ટા
દુષ્ટા અપિ પ્રમથનાથ તવેહ ભાવાત્ ।
શિષ્ટાસ્ત એવ જગતિ શિપિવિષ્ટનિષ્ઠા-
નિષ્ઠાસ્તુ તે તનુભૃતાં સ્વત એવ ધૃ(હૃ)ષ્ટાઃ ॥ ૫૪॥

કોવા પૂજયિતા ભવેત્કુસુમતો યન્મૌલિમૂલં હરિઃ
બ્રહ્મા વાપ્યનુમીતવાંસ્તવ વિભો કસ્તે સદૃક્ષો ગુણઃ ।
કામં મે શિવકામસુન્દરિ ભૃશં સમ્પૂરયેતામ્બિકે
મદ્ભાવં વિનિવેદયાશુ ગિરિજે શ્રીવ્યોમકેશાય તુ ॥ ૫૫॥

ત્વં માતા જગતાં જનિત્રિ સ પિતા વિશ્વેશ્વરો મેઽધુના
તસ્માત્ત્વત્પદભક્તિભાવમતુલં ત્વં દેહિ વિશ્વેશ્વરિ ।
ઇત્યુક્ત્વા પ્રણનામ શમ્ભુપદયોઃ સાનન્દવાર્ધૌ સદા
મગ્નઃ શમ્ભુસલીલલાસ્ય વિલસલ્લોકેઽનુલોકોત્તરમ્ ॥ ૫૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવક્ષેત્રેષુ સુન્દરકૃતા શિવશિવાસ્તુતયઃ સમ્પૂર્ણાઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । સદાશિવાખ્યઃ નવમાંશઃ । અધ્યાયઃ ૨૧ (ચિત્)સભાદર્શનમ્ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . sadAshivAkhyaH navamAMshaH . adhyAyaH 21 (chit)sabhAdarshanam . vAvRRittashlokAH ..

Notes:
Sundara સુન્દર; one of the sixty-three Nāyanāra-s, after being born in Pṛthvīloka પૃથ્વીલોક, worships and eulogizes Śiva શિવ and Śivā શિવા at the several Śivakṣetra શિવક્ષેત્ર that had been enlisted for him to be at by Śiva શિવ in order to be able to experience Śiva Sānnidhya શિવ સાન્નિધ્ય.

Proofread by Ruma Dewan

*Shivakshetreshu Sundarakrita Shivashivastutayah*

pdf was typeset on July 14, 2024

Please send corrections to *sanskrit@cheerful.com*